श्री काळिका कवचं (वैरिनाशकरं)

श्री काळिका कवचं (वैरिनाशकरं)

कैलासशिखरासीनं शंकरं वरदं शिवं |
देवी पप्रच्छ सर्वज्ञं देवदेवं महेश्वरं || 1 ||

देव्युवाच |
भगवन् देवदेवेश देवानां मोक्षद प्रभो |
प्रब्रूहि मे महाभाग गोप्यं यद्यपि च प्रभो || 2 ||

शत्रूणां येन नाशः स्यादात्मनो रक्षणं भवेत् |
परमैश्वर्यमतुलं लभेद्येन हि तद्वद || 3 ||

भैरव उवाच |
वक्ष्यामि ते महादेवि सर्वधर्महिताय च |
अद्भुतं कवचं देव्याः सर्वरक्षाकरं नृणां || 4 ||

सर्वारिष्टप्रशमनं सर्वोपद्रवनाशनं |
सुखदं भोगदं चैव वश्याकर्षणमद्भुतं || 5 ||

शत्रूणां संक्षयकरं सर्वव्याधिनिवारणं |
दुःखिनो ज्वरिणश्चैव स्वाभीष्टप्रहतास्तथा |
भोगमोक्षप्रदं चैव काळिकाकवचं पठेत् || 6 ||

अस्य श्रीकाळिकाकवचस्य भैरव ऋषिः अनुष्टुप् छंदः श्रीकाळिका देवता मम शत्रुसंहारार्थं जपे विनियोगः |

करन्यासः –
ॐ क्रां अंगुष्ठाभ्यां नमः |
ॐ क्रीं तर्जनीभ्यां नमः |
ॐ क्रूं मध्यमाभ्यां नमः |
ॐ क्रैं अनामिकाभ्यां नमः |
ॐ क्रौं कनिष्ठिकाभ्यां नमः |
ॐ क्रः करतलकरपृष्ठाभ्यां नमः |

हृदयादिन्यासः –

ॐ क्रां हृदयाय नमः |

ॐ क्रीं शिरसे स्वाहा |

ॐ क्रूं शिखायै वषट् |

ॐ क्रैं कवचाय हुं |

ॐ क्रौं नेत्रत्रयाय वौषट् |

ॐ क्रः अस्त्राय फट् |

ध्यानं |

ध्यायेत् काळीं महामायां त्रिनेत्रां बहुरूपिणीं |

चतुर्भुजां ललज्जिह्वां पूर्णचंद्रनिभाननां || 7 ||

नीलोत्पलदळप्रख्यां शत्रुसंघविदारिणीं |

नरमुंडं तथा खड्गं कमलं च वरं तथा || 8 ||

बिभ्राणां रक्तवसनां दंष्ट्रया घोररूपिणीं |

अट्टाट्टहासनिरतां सर्वदा च दिगंबरां || 9 ||

शवासनस्थितां देवीं मुंडमालाविभूषितां |

इति ध्यात्वा महादेवीं ततस्तु कवचं पठेत् || 10 ||

अथ कवचं |

ॐ | काळिका घोररूपाद्या सर्वकामप्रदा शुभा |

सर्वदेवस्तुता देवी शत्रुनाशं करोतु मे || 11 ||

ह्रीं ह्रीं स्वरूपिणीं चैव ह्रीं ह्रीं हूं रूपिणीं तथा |

ह्रीं ह्रीं क्षें क्षें स्वरूपा सा सदा शत्रून् विदारयेत् || 12 ||

श्रीं ह्रीं ऐं रूपिणी देवी भवबंधविमोचिनी |

हूं रूपिणी महाकाळी रक्षास्मान् देवि सर्वदा || 13 ||

यथा शुंभो हतो दैत्यो निशुंभश्च महासुरः |

वैरिनाशाय वंदे तां काळिकां शंकरप्रियां || 14 ||

ब्राह्मी शैवी वैष्णवी च वाराही नारसिंहिका |
कौमार्यैंद्री च चामुंडा खादयंतु मम द्विषः || 15 ||

सुरेश्वरी घोररूपा चंडमुंडविनाशिनी |
मुंडमालावृतांगी च सर्वतः पातु मां सदा || 16 ||

ह्रां ह्रीं काळिके घोरदंष्ट्रे रुधिरप्रिये रुधिरपूर्णवक्त्रे रुधिरावृत्तितस्तनि मम शत्रून् खादय खादय हिंस हिंस मारय मारय भिंधि भिंधि छिंधि छिंधि उच्चाटय उच्चाटय द्रावय द्रावय शोषय शोषय स्वाहा | ॐ जय जय किरि किरि मर्दय मर्दय मोहय मोहय हर हर मम रिपून् ध्वंसय ध्वंसय भक्षय भक्षय त्रोटय त्रोटय यातुदानानि चामुंडी सर्वजनान् राज्ञो राजपुरुषान् स्त्रियो वशान् कुरु कुरु तनु तनु धान्यं धनमश्वाश्च गजांश्च रत्नानि दिव्यकामिनीः पुत्रान् राज्यं प्रियं देहि देहि यच्छय यच्छय क्षां क्षीं क्षूं क्षैं क्षौं क्षः स्वाहा || 17 ||

इत्येतत् कवचं दिव्यं कथितं शंभुना पुरा |
ये पठंति सदा तेषां ध्रुवं नश्यंति शत्रवः || 18 ||

प्रळयः सर्वव्याधीनां भवतीह न संशयः |
धनहीनाः पुत्रहीनाः शत्रवस्तस्य सर्वदा || 19 ||

सहस्रपठनात् सिद्धिः कवचस्य भवेत्तदा |
ततः कार्याणि सिद्ध्यंति यथा शंकरभाषितं || 20 ||

श्मशानांगारमादाय चूर्णीकृत्य प्रयत्नतः |
पादोदकेन स्पृष्ट्वा च लिखेल्लोहशलाकया || 21 ||

भूमौ शत्रून् हीनरूपान् उत्तराशिरसस्तथा |
हस्तं दत्त्वा तु हृदये कवचं तु स्वयं पठेत् || 22 ||

शत्रोः प्राणप्रतिष्ठां तु कुर्यान्मंत्रेण मंत्रवित् |
हन्यादस्त्रप्रहारेण शत्रुर्गच्छेद्यमालयं || 23 ||

ज्वलदंगारतापेन भवंति ज्वरिणोऽरयः |
प्रोक्षणैर्वामपादेन दरिद्रो भवति ध्रुवं || 24 ||

वैरिनाशकरं प्रोक्तं कवचं वश्यकारकं |
परमैश्वर्यदं चैव पुत्रपौत्रादिवृद्धिदं || 25 ||

प्रभातसमये चैव पूजाकाले च यत्नतः |
सायंकाले तथा पाठात् सर्वसिद्धिर्भवेद्ध्रुवं || 26 ||

शत्रुरुच्चाटनं याति देशाच्च विच्युतो भवेत् |
पश्चात्किंकरमाप्नोति सत्यं सत्यं न संशयः || 27 ||

शत्रुनाशकरं देवि सर्वसंपत्प्रदे शुभे |
सर्वदेवस्तुते देवि काळिके त्वां नमाम्यहं || 28 ||

इति श्रीरुद्रयामले काळिकाकल्पे वैरिनाशकरं नाम श्री काळिका कवचं |